शाल्मलीकन्दः,पुं,(शाल्मल्याः कन्दः।) शाल्मलिवृक्षमूलम्। तत्पर्य्यायः। विजुलः २ वनवासकः३ वनवासी ४ मलघ्नः ५ मलहन्ता ६। अस्य गुणाः। मधुरत्वम्। मलसंग्रहरोधजयकारित्वम्। शिशिरत्वम्। पित्तदाहार्त्तिशोफसन्तापनाशित्वञ्च। इति राजनिर्घण्टः॥

शाल्मलीफलः,पुं,(शाल्मल्याः फलमिव फलं यस्य।) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

शाल्मलीवेष्टः, पुं, ( शाल्मल्या वेष्टः। ) शाल्मलिनिर्यासः। शिमुल आठा इति भाषा॥ तत्पर्य्यायः। पिच्छा २। इत्यमरः॥ मोचरसः ३ शाल्मलः ४ शाल्मलीवेष्टकः ५। इति रत्नमाला॥ मोचस्रावः ६ मोचनिर्यासः ७। अस्य गुणाः।

"मोचस्रावो हिमो ग्राही स्निग्धो वृष्यः
कषायकः।
प्रवाहिकातिसारामकफपित्तास्रदाहनुत्॥"
इति भावप्रकाशः॥

शाल्मलीवेष्टकः, पुं, (शाल्मलीवेष्ट+स्वार्थे कन्। शाल्मलीवेष्टः। इति रत्नमाला॥

शाल्वः, पुं, देशविशेषः। यथा,—

"शाल्वास्तु कारकुचीया मरवस्तु दशेरकाः॥"
इति हेमचन्द्रः॥

राजविशेषः। इति महाभारतम्॥ (भीष्मेण सहास्य युद्धवृत्तान्तो महाभारते आदिपर्व्वणि १०२ अध्याये तथा कृष्णेन सहास्य युद्धवृत्तान्तस्तत्रैव वनपर्व्वणि १५ अध्यायमारभ्य द्रष्टव्यः॥)

शाल्वणः, पुं, वातघ्नौषधगणविशेषः। यथा,—

"काकोल्यादिः स वातघ्नः सर्व्वाम्लद्रव्यसंयुतः।
सानूपौदकमांसस्तु सर्व्वस्नेहसमन्वितः॥
सुखोष्णः सुलवणः शाल्वणः परिकीर्त्तितः।
तेनोपनाहं कुर्व्वीत सर्व्वदा वातरोगिणाम्॥"
इति सुश्रुते चिकित्सितस्थाने ५ अध्यायः॥

शावः, पुं, ( शवति प्राप्यते इति। शव गतौ+घञ्।) शिशुः। इति शब्दरत्नावली॥ (यथा रघुवंशे। ६। ३।

"शिलाविभङ्गैर्म्मृगराजशावः
तुङ्गं नगोत्सङ्गमिवारुरोह॥"

शवस्यायम्। शव+अण्।) शवसम्बन्धिनि, त्रि॥ यथा,—

"गृहणे शावमाशौचं विमुक्तो मौलिकं स्मृतम्।
तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रमः॥"
इति तिथ्यादितत्त्वे ब्रह्माण्डपुराणम्॥

शावकः, पुं, ( शाव एव। स्वार्थे कन्।) शिशुः। इत्यमरः॥ ( यथा, बृहत्संहितायाम्। ४८। १३।

"दत्ताभयखगम्गशावकेषु तेष्वाश्रमेष्वथवा॥")

शाबरः, पुं, ( शबराणामयम्। शबर+अण्।) पापम्। अपराधः। लोध्रवृक्षः। इति मेदिनी॥ शबरस्वामिकृतभाष्यविशेषः। शिवकृततन्त्रविशेषश्च। शबरसम्बन्धिनि, त्रि। यथा,—

"संपूज्य प्रेषयं कुर्य्यात् दशम्यां शाबरोत्सवैः॥"
इति तिथ्यादितत्त्वम्॥

शाबरभेदाख्यं, क्ली, ताम्रम्। इति हेमचन्द्रः॥

शाबरी, स्त्री, शूकशिम्बी। इति मेदिनी॥

शाबरोत्सवः, पुं, ( शाबराणामुत्सवः।) म्लेच्छकृतोत्सवः। यथा,—

"पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्ज्जयेत् दशम्यां तु श्रवणे शाबरोत्सवैः॥
अन्तःपाते दिवाभागे श्रवणस्य यदा भवेत्।
तदा संप्रेषणं देया दशम्यां शाबरोत्सवैः॥
रागिणीभिः कुमारीभिर्व्वेश्याभिर्न्नर्त्तकैस्तथा।
शङ्खतूर्य्यनिनादैश्च मृदङ्गैः पटहैस्तथा॥
ध्वजैर्व्वस्त्रैर्बहुविधैर्लाजपुष्पप्रकीर्णकैः।
धूलीकर्द्दमविक्षेपैः क्रीड़ाकौतुकमङ्गलैः॥
भगलिङ्गविधानैश्च भगलिङ्गप्रगीतकैः।
भगलिङ्गादिशब्दैश्च क्रीड़येयुरलं जनाः॥
परैर्न्निक्षिप्यते यस्तु यः परं नाक्षिपत्यपि।
क्रुद्धा भगवती तस्य शापं दद्यात् सुदारुणम्॥"
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः॥

शाश्वतं, त्रि, ( शश्वद्भवम्। शश्वत्+अण्।) नित्यम्। इत्यमरः॥ ( यथा, रामायणे। १। २। १५।

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

पारिभाषिकशाश्वतं यथा,—

"शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम्।
शाश्वतं सगुणा विद्याः सुहृन्मित्रञ्च शाश्वतम्॥"
इति गारुड़े नीतिसागरे १०६ अध्यायः॥

शाश्वतः, पुं, वेदव्यासः। इति शब्दरत्नावली॥ (शिवः। यथा महाभारते। १३। १७। ३२।

"प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः॥")

शाष्कुलः, त्रि, मांसाशी। इति हेमचन्द्रः॥

शाष्कुलिकं, क्ली, ( शष्कुल+समूहार्थे ठक्।) शष्कुलिसमूहः। इत्यमरः॥

शास, उ ष लु शासने। इति कविकल्पद्रुमः॥ ( अदा०-पर०-सक०-सेट्। क्त्वावेट्।) उ, शासित्वा शिष्ट्वा। ष, शासति। लु, शास्ति। शास्ति यस्याज्ञया राज्ञः स सम्राड़ित्यमरः। इति दुर्गादासः॥

शास ङ उ } आशिषि। इति कविकल्पद्रुमः॥
शास ल ङ } (भ्वा०-अदा० च-आत्म०-सक०-सेट्।) आङ्पूर्व्वा इति केवलानामन्यपूर्व्वाणाञ्च प्रयोगनिरासार्थम्। किन्तु इदं गुरुभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे। इत्युत्तरचरिते प्रपूर्व्वोऽपि दृश्यते। ङ, आशासते। उ, आशासित्वा आशास्त्वा। पञ्चमस्वरानुबन्धसामर्थ्यात् क्त्वाप्रत्ययस्य न यप् समासाभावादिति गोविन्दभट्टः। किन्तु अस्य उदनुबन्धफलं छन्दस्येवेति धातुप्रदीपः। ल ङ, आशास्ते शासु ङिहस इति इत्यत्र जक्षादीयशास्तेरेव ग्रहणादस्योपधाया इकारो न स्यात्। आशीरिष्टार्थाशंसनम्। इच्छायामित्यन्ये। इति दुर्गादासः॥

शासनं, क्ली, ( शास+ल्युट्।) आज्ञा। ( यथा, मनौ। ९। २६२।

"कुर्व्वीत शासनं राजा सम्यक् सारापराधतः॥")

तत्पर्य्यायः। अववादः २ निर्द्देशः ३ निदेशः ४ शिष्टिः ५। इत्यमरः॥ शास्तिः ६। इति भरतः॥ आदेशः ७ आदेशनम् ८। इति शब्दरत्नावली॥ शास्त्रम् ९। इति जटाधरः॥ राजदत्तभूमिः। लेखा। शास्त्रम्। शास्तिः। इति मेदिनी॥ ( दानलिखिततास्रफलकादिः। यथा, कथासरित्सागरे। १२४। ६२-६३।

"शासनं लेखयित्वा च तमेवं स समादिशत्।
ॐकारपीठमार्गेण भद्र गच्छोत्तरां दिशम्॥
तत्रामुना शासनेन ग्रामं भुङ्क्ष्व मदर्पितम्।
नाम्ना तं खण्डवटकं पृच्छन् गच्छन्नवाप्स्यसि॥"

यथाच मार्कण्डेये। ३६। ८।

"वाच्यं ते शासनं मत्तं क्षुद्राचरनिवेशितम्॥"

स्त्रियां धर्म्मोपदेशकर्त्री। यथा, ऋग्वेदे। १। ३१। ११।

"इळामकृण्वन्मनुषस्य शासनीम्॥")

शासनहरः, पुं, ( हरतीति। हृ+अच्। शासनस्य हरः।) राजदूतः। आज्ञावाहकः। इति केचित्॥

शासितः, त्रि, (शास+क्तः।) कृतशासनः। यथा,

"सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम्॥"
इति पञ्चतन्त्रम्॥

शासिता, [ऋ] त्रि, ( शासु+तृच्।) शास्ता। इति त्रिकाण्डशेषः॥ ( यथा, मनौ। ७।१७।

"स राजा पुरुषो दण्डः स नेता शासिता च सः॥"

आख्याता। यथा, तत्रैव। २। १५०।

"ब्राह्मस्य जन्मनः कर्त्ता स्वधर्म्मस्य च
शासिता॥")

शास्ता, [ऋ] त्रि, ( शासु+"तृन्तृचौ शंसीति।" उणा० २। ९४। इति असंज्ञायामपि तृन्। स च अनिट्।) शासनकर्त्ता। तत्पर्य्यायः। देशकः २ शासिता ३। इति त्रिकाण्डशेषः॥ यथा,—

"द्वौ धाता च विधाता च पौराणौ जगतः
पती।
द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥

( यथा च भागवते। १। १२। २६।

"राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम्॥")

शास्ता, [ऋ] पुं, ( शासु+"तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ।" उणा० २।९४। इति तृन्। स च अनिट्।) बुद्धः। इत्यमरः॥ उपाध्यायः। राजा। पिता। इति संक्षिप्तसारोणादिवृत्तिः॥